# १ प्रथम दशकः - देवी महिमा

यस्मिन्निदं यत इदं यदिदं यदस्मात्
उत्तीर्ण रूप मभिपश्यति यत्समस्तम् ।
नो दृश्यते च वचसां मनसश्च दूरे
यद्धाति चादि महसे प्रणमामि तस्मै ॥ १-१॥

न स्त्री पुमान् न सुरदैत्य नरादयो न
क्लीबं न भूतमपि कर्म गुणादयश्च ।
भूमं स्त्वमेव सदनाद्य विकार्यनन्तं
सर्वं त्वया जगदिदं विततं विभाति ॥ १-२॥

रूपं न तेऽपि बहुरूप भृदात्तशक्तिः
नाट्यं तनोषि नटवत्खलु विश्वरङ्गे ।
वर्षाणि ते सरस नाट्य कला विलीना
भक्ता अहो सहृदया क्षणव न्नयन्ति ॥ १-३॥

रूपानुसारि खलु नाम ततो बुधैस्त्वं
देवीति देव इति चासि निगद्यमाना ।
देव्यां त्वयीर्यस उमा कमलाऽथ वाग् वा
देवे तु षण्मुख उमापति रच्युतो वा ॥ १-४॥

त्वं ब्रह्म शक्ति रपि धातृ रमेश रुद्रैः
ब्रह्माण्ड सर्ग परिपालन संहृतीश्च ।
राज्ञीव कारयसि सुभ्रु निजाज्ञयैव

भक्तेष्वनन्य शरणेषु कृपावती च ॥ १-५॥

माता करोति तनयस्य कृते शुभानि
कर्माणि तस्य पतने भृशमेति दुःखम् ।
वृद्धौ सुखं च तव कर्म न नापि दुःखं
त्वं ह्येव कर्म फलदा जगतां विधात्री ॥ १-६॥

सर्वत्र वर्षसि दया मत एव वृष्ट्या
सिक्तः सुबीज इव वृद्धि मुपैति भक्तः ।
दुर्बीजवद् व्रजति नाश मभक्त एव
त्वं निर्घृणा न विषमा न च लोकमातः ॥ १-७॥

सर्वोपरीश्वरि विभाति सुधा समुद्रः
तन्मध्यतः परिवृते विविधैः सुदुर्गैः ।
छत्रायिते त्रिजगतां भवती मणिद्वीप
आख्ये शिवे निजपदे हसिताननाऽऽस्ते ॥ १-८॥

यस्ते पुमा नभिदधाति महत्त्व मुच्चैः
यो नाम गायति शृणोति च ते विलज्जः ।
यश्चातनोति भृश मात्म निवेदनं ते
स स्वान्यघानि विधुनोति यथा तमोऽर्कः ॥ १-९॥

त्वां निर्गुणां च सगुणां च पुमान् विरक्तो
जानाति किञ्चिदपि नो विषयेषु सक्तः ।
ज्ञेया भव त्वमिह मे भवताप हन्त्रीं
भक्तिं ददस्व वरदे परिपाहि मां त्वम् ॥ १-१०॥